# अन्तेवासिनां दिनचर्या

## (छात्रैः प्रस्तुतः अयं लेखः)

छात्राणामध्ययनं तपः। अध्ययनात्मकनेन तपसा आराध्यमानदेव्याः सरस्वत्या वाङ्मयी वन्दना सम्पाद्यते विद्यार्थिभिरेव। स एव तेषां तपोवनम्। वयमपि वाणीवन्दारवः वाणीपादाब्जमधुपाः विवेकानन्दविश्वविद्यालये वसन्तः प्रत्यहमध्ययनात्मकं तपश्चरामः। विद्यापीठोऽयं स्वामिविवेकानन्दमहाभागानामाशीर्वादपुष्टः। तेषां वचनमनुसृत्यैवास्माकं विश्वविद्यालयेऽपि लक्ष्यद्वयसाधनीभूता परापरात्मिका द्विविधा अपि उपदिश्यते आचार्यैः। स्वामिनां नये सैव विद्या यया अन्तरात्मनः पूर्णविकाशः संसाध्यते। अतोऽत्र सदाचारः अपि शिक्ष्यते अध्येतृभिः। तेषामादर्शमनुसरन्तः प्रतिदिनं ब्राह्मे मुहूर्ते शय्यात्यागं कृत्वा हस्तपादादिकं प्रक्षाल्य पूतवासांसि परिधाय प्रातःकालिकं सन्ध्योपासनं समाचरामः। ततः उषसि पूजापुष्पचयनादिकं समाप्य प्रातराशं स्वीकृत्य पाठेषु प्रवर्तामहे। ततः नववादने स्नानादिकं समाप्य समुचितवेशं परिधाय मध्याह्नभोजनं स्वीकृत्य पाठकक्षेषु प्रविशामः। दशवादनतः विश्वविद्यालयीयकार्यारम्भः। विश्वविद्यालये वयमधुना समन्वितएम.ए.-कक्षायामधीयानाः। किन्तु संस्कृतशास्त्रैः सह अत्र सङ्गणका-ऽङ्गलभाषा-सामाजिकशास्त्रादीनामपि अध्यापनं भवति। किञ्च सर्वासु अपि कक्षासु वेदपाठ आध्यात्मिकशास्त्रपाठश्च आवश्यकः। अपराह्णे प्रायः सार्धत्रिवादनपर्यन्तं विश्वविद्यालयीयकार्यं प्रचलति। मध्ये एकवादनतः सार्धैकवादनपर्यन्तं अर्धहोरात्मिका विरतिः। ततः सार्धचतुर्वादने स्वल्पाहारं स्वीकृत्य अन्तेवासिनः क्रीडितुं गच्छन्ति। केचन संवादपत्रपठनेन केचिद् विद्यालयीयपरिसरे मठपरिसरे वा परिभ्रमन्तः व्यायामागारे व्यायामं कुर्वन्तो वा अवकाशविनोदं कुर्वन्ति। ततः सपादषड्वादने हस्तपादादिकं प्रक्षाल्य सन्ध्योपासनं सम्पाद्य पुनः पाठेषु प्रवर्तामहे। अथ सार्धनववादने रात्रिकालिकं भोजनं सम्पाद्य होरात्मककालं पुनः पठनादनन्तरं शेरते छात्राः। परेद्यवि पुनः ब्राह्मे मुहूर्ते उत्थाय पूर्ववद् दिनचर्यां सम्पादयन्ति।

अनाडम्बरं जीवनं यापयन्तः महतो विषयस्य चिन्तनं कुर्वन्ति छात्राः। तेषां समुन्नतये अत्रत्या आचार्या अपि क्लान्तिरहितं परिश्रमं कुर्वन्ति च्छात्राणां कार्याकार्यविक्षणे सततं जागरूकाः। प्रतिवर्षं नेट्-इत्यादिषु परीक्षासु अत्रत्याः प्रायः सर्वे छात्राः उत्तीर्णा भवन्ति, अधिकास्तु शोधवृत्तिमपि प्रप्नुवन्ति। अन्यत्र आयोज्यमानप्रतिस्पर्धासु अत्रत्या बहव एव पुरस्कारैः सभाज्यन्ते। एवमेव च्छात्राणां सार्विकी समुन्नतिर्भवति।